**B.A. 1st Semester (Programme) Examination, 2020-21**

**Subject: Sanskrit**

**Course ID: 10919** **Course Code: ACPSNS-103C-MIL-1**

**Course Title – MIL - 1**

**Full Marks – 40** **Time– 2hrs**

**क) अधोलिखितेषु परिच्छेदेषु यथेच्छमेकं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 10x1=10**

a) आसीत् वाराणस्यां कर्पूरपटो नाम रजकः। स चैकदा निर्भरं प्रसुप्तः। तदनन्तरं तस्य द्रव्याणि हर्तुं चौरः प्रविष्टः। तस्य प्राङ्गणे गर्दभो बद्धः कुक्कुरश्च उपविष्ट आसीत्। चौरम् अवलोक्य गर्दभः श्वानमाह – "भवतः इदानीं व्यापारः, तत्किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि।"

(१) किं नाम रजकस्य? 1

(२) रजकस्य कुत्र निवासः? 1

(३) गर्दभकुक्कुरौ कुत्र आस्ताम्? 2

(४) चौरं दृष्ट्वा गर्दभः कुक्कुरं किमाह? 2

(५) रजकस्य गृहे कः कथं प्रविष्टः? 2

(६) रजकः किं करोति स्म? 2

b) आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः। स कदाचिन्मांसलुब्धो धनुः आदाय विन्ध्याटवीं गतः। तत्र तेन मृग एको व्यापादितः। मृगमादाय गच्छता तेन घोराकृतिः शूकरः दृष्टः। ततः तेन मृगं भूमौ निधाय शूकरः शरेण आहतः। शूकरः अपि आगत्य प्रलयघोरगर्जनं कुर्वन् एव व्याधपाददेशे हतः छिन्नमूलद्रुम इव पपात। अथ तस्य पादास्फालनेन सर्पः अपि मृतः।

(१) व्याधस्य नाम किम्? 1

(२) तस्य कुत्र निवासः? 1

(३) मृगं नीत्वा गच्छन् स कं कुत्र दृष्टवान्? 2

(४) केन अस्त्रेण स पशुद्वयं जघान? 2

(५) शूकरः कथं पपात? 2

(६) शूकरस्य पादास्फालनेन कः मृतः? 2

c) प्राचीनभारते मगधजनपदे नन्दवंशस्य साम्राज्यम् आसीत्। तस्मिन् राज्ये बुद्धिमन्तः मन्त्रिणः कर्तव्यनिष्ठाः कर्मचारिणः च राज्ञः साहाय्यं कुर्वन्ति स्म। मगधसाम्राज्यस्य सभायां गुणवन्तः चिन्तनशीलाः ज्ञानिनश्च पण्डिता आसन्। ते विद्वांसः समदर्शिनः आसन्। अतः न्यायव्यवस्था अतीव समीचीना आसीत्। तस्मिन् राज्ये शक्तिमन्तः सैनिकाः दीर्घकायाः वीराश्च आसन्। तैः तत्र अश्वशालायां श्वेतेभ्यः कृष्णेभ्यः रक्तेभ्यः विचित्रवर्णेभ्यः च बलिष्ठेभ्यः अश्वेभ्यः युद्धप्रशिक्षणं दीयते स्म। नगरस्य वैभवमपि उत्कृष्टमासीत्। तत्र उन्नतं दीर्घं च भवनं, सुन्दरं सुरम्यं मनोहरं च उद्यानं, विशालः तडागः सुदीर्घः राजमार्गः च नगरस्य शोभां वर्धयन्ति स्म।

(१) नन्दवंशस्य साम्राज्यं कुत्र आसीत्? 1

(२) राज्ञः मन्त्रिणः कीदृशा आसन्? 2

(३) नगरस्य शोभा कीदृशी आसीत्? 3

(४) तत्र सैनिकाः कीदृशाः? 3

(५) सैनिकाः केभ्यः युद्धप्रशिक्षणं यच्छन्ति स्म? 1

**ख) यथेच्छमेकस्य शब्दस्य रूपाणि लिखत।** **5x1=5**

१) रामशब्दस्य २) नदीशब्दस्य

**ग) यथेच्छं द्वयोः समाधानं कार्यम्।** **5x2=10**

१) कृधातोः परस्मैपदे विधिलिङि लटि च रूपाणि लिखत।

२) लभ्-धातोः लोटि लृटि च रूपाणि लिखत।

३) भूधातोः लङि लृटि च रूपाणि लिखत।

४) खाद्-धातोः विधिलिङि लृटि च रूपाणि लिखत।

**घ) पञ्चानां रेखाङ्कितपदानां सकारणविभक्तिनिर्देशः कार्यः।** **2x5 = 10**

१) चन्दनः चोराद् बिभेति।

२) रामेण सह लक्ष्मणः वनं गच्छति।

३) अहं हस्तेन खादामि।

४) रामः विद्यालयं गच्छति।

५) वने गावः चरन्ति।

६) श्रीकृष्णाय नमः।

७) कृष्णं विना शून्यमिदं जगत्।

८) भिक्षुकाय राजा धनं ददाति।

**ङ) यथेच्छं प्रश्नपञ्चकं समाधेयम्।** **5**

१) सेव्-धातोः शानच्प्रत्यये किं रूपम्?

२) आङ्पूर्वकाद् गम्-धातोः ल्यपि किं रूपम्?

३) दातुम् इत्यत्र कः प्रत्ययः का च प्रकृतिः?

४) पठनम् इत्यत्र का प्रकृतिः कश्च प्रत्ययः?

५) कृधातोः क्त्वाप्रत्यये किं रूपम्?

६) पाधातोः यत्प्रत्यये क्लीबलिङ्गे किं रूपम्?

७) गम्-धातोः तुमुन्प्रत्यये किं रूपम्?

८) कार्यम् इत्यत्र व्युत्पत्तिः का?

**अथवा**

१) ईक्ष्-धातोः शानच्प्रत्यये किं रूपम्?

२) प्रपूर्वकाद् नम्-धातोः ल्यपि किं रूपम्?

३) वक्तुम् इत्यत्र कः प्रत्ययः का च प्रकृतिः?

४) गमनम् इत्यत्र का प्रकृतिः कश्च प्रत्ययः?

५) वच्-धातोः क्त्वाप्रत्यये किं रूपम्?

६) चिधातोः यत्प्रत्यये क्लीबलिङ्गे किं रूपम्?

७) नम्-धातोः तुमुन्प्रत्यये किं रूपम्?

८) देयम् इत्यत्र व्युत्पत्तिः का?